“सौरी शिला दुर्लभैव प्रायः कलियुगे पुनः । स्फटिकाभा भवेत् सा तु घर्मं नित्यं विमुञ्चति । गणेशः स तु विज्ञेयः स्वल्पशुण्डाङ्कितो भवेत् । शुण्डाकारा शिला वापि गजाननसमापि वा । यस्या मध्ये महच्चक्रं सूक्ष्मचक्रञ्च यद्दृशि । सा शिला तस्य दिक्पस्य सेव्या सद्दृशि राज्यदा । अर्द्धचन्द्राकृतिर्यत्र दृश्यते सकलद्रवम् । सा तु चन्द्रशिला त्र्यस्रयुक्ता भौमशिला मता । वाणाकारेण चिह्नेन ज्ञेया बुधशिला सुराः ! । दीर्घेण चतुरस्रेण युक्ता गुरुशिला मता । पञ्चकोणा तु शुक्रस्य बाणाकारा शनेर्मता । सर्पाकारा तु राहोः स्यात् केतोस्तु ध्वजरूपिणी” मेरुत० ।

तुलसीं प्रति भगवदुक्तिः “अहञ्च शैलरूपी च गण्डकीतीरसन्निधौ । अधिष्ठानं करिष्यामि भारते तव शापतः । वज्रकीटाश्च क्रमयो वज्रदंष्ट्राश्च तत्र वै । तच्छिलाकुहरे चक्रं करिष्यन्ति मदीयकम् । एकद्वारे चतुश्चक्रं वनमालाविभूषितम् । नवीननीरदाकारं लक्ष्मीनारायणाभिधम्१ । एकद्वारे चतुश्चक्रं नवीननीरदोपमम् । लक्ष्मीजनार्द्दनं२ ज्ञेयं रहितं वनमालया । द्वारद्वये चतुश्चक्रं गोष्पदेन समन्वितम् । रघुनाथाभिधं३ ज्ञेयं वेष्टितं वनमालया । अतिक्षुद्रं द्विचक्रन्तु नवीननीरदोपमम् । दधिवामनं४ विज्ञेयं गृहिणाञ्च सुखप्रदम् । अतिक्षुद्रं द्विचक्रञ्च वनमालाविभूषितम् । श्रीधरं देवि ! विज्ञेयं श्रीपदं गृहिणां सदा । स्थूलञ्च वर्त्तुलाकारं रहितं वनमालया । द्विचक्रं स्फुटमत्यन्तं ज्ञेयं दामोदराभिधम्६ । मध्यमं वर्त्तुलाकारं द्विचक्रं वाणविक्षतम् । बलरामाभिधं८ ज्ञेयं शरतूणसमन्वितम् । स्थूलं चतुर्दशचक्रं नवीनजलदप्रभम् । अनन्ताख्यक९ विज्ञेयं चतुर्वर्गफलप्रदम् । मध्यमं सप्तचक्रञ्च छत्रतूणसमन्वितम् । राजराजेश्वरं१० ज्ञेयं राजसम्पत्करं नृणाम् । चक्राकारं द्विचक्रञ्च सश्रीकं जलदप्रभम् । सगोष्पदं मध्यमञ्च विज्ञेयं मधुसूदनम्११ । सुदर्शनं१२ चैकचक्रं गुप्तचक्रं गदाधरम्१३ । द्विचक्रं हयवक्त्राभं हयग्रीवं१४ प्रकीर्त्तितम् । अतीव विस्तृतास्यञ्च द्विचक्रं विकटं सति ! । नरसिंहाभिधं१५ ज्ञेयं सद्यो वैराग्यदं नृणाम् । द्विचक्रं विस्तृतास्यञ्च वनमालासमन्वितम् लक्ष्मीनृसिंहं१६ विज्ञेयं गृहिणां सुखदं सदा । द्वारदेशे द्विचक्रञ्च सश्रीकञ्च समं स्फुटम् । वासुदेवञ्च१७ विज्ञेयं सर्वकामफलप्रदम् । प्रद्युम्नं१८ सूक्ष्मचक्रञ्च नवीननीरदप्रभम् । सुषिरे छिद्रबहुलं गृहिणाञ्च सुखप्रदम् । द्वे चक्रे चैकलग्ने तु पृष्ठे यत्र तु पुष्कलम् । सङ्कर्षणन्तु१९ विज्ञेयं सुखदं गृहिणां सदा । अनिरुद्धञ्च२० पीताभं वर्त्तुलमतिशोभनम् । सुखप्रदं गृहस्थानां प्रवदन्ति मनीषिणः” ब्रह्मवै० प्र० १९ अ० ।

“शालग्रामशिलाद्वारगतलग्नद्विचक्रधृक् । शुक्लाभो वासुदेवाख्यः१ सोऽव्यात् यः श्रीगदाधरः । लग्नद्विचक्रो रक्ताभः पूर्वभागे तु पुष्कलः । सङ्कर्षणो२ऽथ प्रद्युम्नः३ सूक्ष्मचक्रस्तु पीतकः । सुदीर्घशुषिरच्छिद्रः सोऽनिरुद्धस्तु४ वर्त्तुलः । नीलो द्वारि त्रिरेखश्च अथ नारायणो५ऽसितः । मध्ये गदाकृती रेखा नाभिचक्रमहोन्नतः । पृथुचक्रो नृसिंहो(६)ऽथ कपिलोऽव्यात् त्रिबिन्दुकः । अथ वा पञ्चबिन्दुस्तत्पूजनं ब्रह्मचारिणाम् । वराहः७ शुभलिङ्गोऽव्यात् विषमस्थद्विचक्रकः । नीलस्त्रिरेखः स्थूलोऽथ कूर्ममूर्त्तिः८ सबिन्दुमान् । कृष्णः स वर्त्तुलावर्त्तः पातु चोन्नतपृष्ठकः । श्रीधरः९ पञ्चरेखोऽव्यात् वनमाली गदान्वितः । वामनो१० वर्त्तुलो ह्रस्वः वामचक्रः सुरेश्वरः । नानावर्णोऽनेकमूर्त्तिर्नागभोगी त्वनन्तकः११ । स्थूलो दामोदरो१२ नीलो मध्ये चक्रः स नीलकः । संकीर्णद्वारकः सोऽव्यादथ ब्रह्मा१३ सुलोहितः । सदीर्घरेखशुषिर एकचक्राम्बुजः पृथुः । पृथुच्छिद्रः स्थूलचक्रः कृष्णो विष्णुस्तु१४ बिन्दुमान् । हयग्रीवो१५ऽङ्कुशाकारः पञ्चरेखः सकौस्तुभः । वैकुण्ठो१६ मणिरत्नाभः एकचक्राम्बुजोऽसितः । मत्स्यो१७ दीर्घाम्बुजाकारो द्वाररेखश्च पातु वः । वामचक्रो द्वाररेखः श्यामो वोऽव्यात् त्रिविक्रमः१८ । एकेन लक्षितो योऽव्यात् गदाधरो सुदर्शनः१९ । एकद्वारे चतुश्चक्रं वनमालाविभूषितम् । स्वर्णरेखासमायुक्तं गोष्पदेन विराजितम् । कदम्बकुसुमाकारं लक्ष्मीनारायणं विदुः” गरुड़ पु० ४५ अ० पुराणान्तरेष्वपि लक्षणान्तराणि उक्तानि दृश्यानि । तत्र लक्षणभेदस्तु विकल्पार्थः ।

वराहपु० भूमिं प्रति वराहोक्तिः “गृहे लिङ्गद्वयं नार्च्यं शालग्रामद्वयं तथा । द्वे चक्रे द्वारकायास्तु नार्च्ये सूर्यद्वयं तथा । शालग्रामशिला भग्ना पूजनीया सचक्रिका । खण्डिता स्फुटिता वाऽपि शालग्रामशिला शुभा । शालग्रामो न स्प्रष्टव्यो हीनवर्णैर्वसुन्धरे ! । स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मतः । मोहात् यः